टिप्पणी

209sk06

# 6

# यद्भविष्यो विनश्यति

प्रस्तुत पाठ विष्णुशर्मा द्वारा रचित 'पञ्चतन्त्रम्' नामक प्रसिद्ध कथाग्रन्थ से संकलित है। इसमें संकट के समय अनागतविधाता, प्रत्युत्पन्नमति तथा यद्भविष्य नामक (एक जलाशय में रहने वाली) तीन मछलियों के परस्पर वार्तालाप का अत्यन्त रोचक एवं लोकोपयोगी वर्णन है। इसे पढ़ने के बाद विद्यार्थी स्वयमेव निश्चय कर सकेंगे कि सिर पर आई विपत्ति से आत्मरक्षा का उपाय किस प्रकार करना चाहिए। केवल भाग्य के भरोसे पर बैठे रहने वाला मनुष्य नष्ट हो जाता है। इसलिये सर्वदा दूरदृष्टि से कार्य करना चाहिए।

## उद्देश्यानि

**इमां कथां पठित्वा भवान्/भवती**

- प्रदत्तानि वाक्यानि पुनः कथाक्रमेण लेखिष्यति;
- प्रदत्तकथनमाधृत्य प्रश्ननिर्माणं करिष्यति;
- यथासमयं कृतस्य निर्णयस्य महत्त्वं लेखिष्यति;
- क्त्वा-ल्यप् प्रत्ययान्तानां पदानां चयनं करिष्यति;
- समस्तपदानां विग्रहं करिष्यति;
- व्यञ्जनसन्धियुक्तानां पदानां सन्धिच्छेदं करिष्यति;
- संख्यापदानां रूपाणि लेखिष्यति।

## क्रियाकलापः 6.1

अधोदत्तचित्रद्वयम् आधृत्य वाक्यानि लिखितानि। तानि चित्रानुसारं पृथक् कृत्वा लिखत।।

टिप्पणी



चित्र 6.1: आग लगने पर कुँए से पानी ले जाकर आग बुझाते हुए



चित्र 6.2: आग लगने पर कुँआ खोदते हुए

(i) जनाः जलाय कूपं खनन्ति।

(ii) जनाः जलेन अग्निं शमयन्ति।

(iii) गृहं ज्वलति, जनाः च पश्यन्ति।

(iv) जनाः कूपात् जलं निष्कासयन्ति।

(v) गृहम् अग्निना पूर्णतया नश्यति।

(vi) जलेन वह्निः शाम्यति गृहं च सुरक्षितं तिष्ठति।

## 6.1 इदानीं मूलपाठं पठामः

### प्रथमः एकांशः

कस्मिंश्चित् जलाशये अनागतविधाता, प्रत्युत्पन्नमतिः यद्भविष्यश्चेति त्रयो मत्स्याः प्रतिवसन्ति स्म। अथ कदाचित् जलाशयं दृष्ट्वा गच्छद्भिः मत्स्यजीविभिः उक्तं यद् अहो बहुमत्स्योऽयं ह्रदः कदाचिदपि न अस्माभि:अन्वेषितः। तदद्य तावदाहारवृत्तिः सञ्जाता सन्ध्यासमयः चापि संवृत्तः। अतः श्वः प्रभाते अत्रागत्य मत्स्यसंक्षयं करिष्याम इति।

तेषां तत् कुलिशपातोपमं वचः श्रुत्वा अनागतविधाता सर्वान् मत्स्यान् आहूयेदम् उवाच, 'अहो, श्रुतं भवद्भिर्यन्मत्स्यजीविभिः अभिहितम्। तद् रात्रौ एव गम्यतां किञ्चिन्निकटं सरः। उक्तञ्च–

अशक्तैर्बलिनः शत्रोः कर्त्तव्यं प्रपलायनम्।<br>
श्रयितव्योऽथवा दुर्गो नान्या तेषां गतिर्भवेत्॥1॥

तन्नूनं प्रभातसमये मत्स्यजीविनोऽत्र समागत्य मत्स्यसंक्षयं करिष्यन्ति, एतन्मम मनसि वर्तते। तन्न युक्तं साम्प्रतम् क्षणमप्यत्र अवस्थातुम्। तदाकर्ण्य प्रत्युत्पन्नमतिः प्राह, "अहो सत्यमभिहितं भवता। ममाप्यभीष्टमेतत्। तदन्यत्र गम्यताम् इति।

### द्वितीयः एकांशः

तच्छ्रुत्वा उच्चैः विहस्य यद्भविष्यः प्रोवाच– 'अहो, न भवद्भ्यां मन्त्रितं सम्यक् एतदिति। यतः किं वाङ्मात्रेणैव तेषां पितृपैतामहिकम् एतत् सरः त्यक्तुं युज्यते? यदि आयु:क्षयोऽस्ति तदन्यत्र गतानामपि मृत्युः भविष्यत्येव। उक्तञ्च–

अरक्षितं तिष्ठति दैवरक्षितं सुरक्षितं दैवहतं विनश्यति।<br>
जीवत्यनाथोऽपि वने विसर्जितः कृतप्रयत्नोऽपि गृहे विनश्यति॥2॥

तदहं न यास्यामि। भवद्भ्यां च यत्प्रतिभाति तत्कर्तव्यम्।' तस्य तं निश्चयं ज्ञात्वा अनागतविधाता प्रत्युत्पन्नमतिश्च परिवारजनेन सह निष्क्रान्तौ।

अथ प्रभाते मत्स्यजीविभिर्जालेन तज्जलाशयम् आलोड्य यद्भविष्येण सह तत्सरो निर्मत्स्यतां नीतम्। अतोऽहं ब्रवीमि–

अनागतविधाता च प्रत्युत्पन्नमतिस्तथा<br>
द्वावेतौ सुखमेधेते यद्भविष्यो विनश्यति। इति॥3॥

### टिप्पणी

**प्रथमः एकांशः**

**शब्दार्थाः**

कस्मिंश्चित् जलाशये = किसी सरोवर में,
मत्स्याः = मच्छ
प्रतिवसन्ति स्म = रहते थे।
कदाचित् = किसी समय,
गच्छद्भिः = जाते हुए (के द्वारा),
मत्स्यजीविभिः = मछुआरों के द्वारा,
ह्रदः = तालाब,
अन्वेषितः = खोजा गया,
आहारवृत्तिः = भोजन का व्यापार,
सञ्जाता, = हो गया है,
मत्स्यसंक्षयम् = मच्छों का नाश,
कुलिशपातोपमम् = वज्रपात के समान,
आहूय = बुलाकर, उवाच = बोला
अभिहितम् = कहा गया है,
सरः = सरोवर को,
अशक्तैः = सामर्थ्यहीन लोगों द्वारा,
बलिनः = शक्तिशाली (शत्रु से),
श्रयितव्यः = आश्रय लेना चाहिए,
समागत्य = आकर, मनसि = मन में,
न युक्तम् = उचित नहीं है,
साम्प्रतम् = अब,
अवस्थातुम् = रुकना/रहना,
प्रत्युत्पन्नमतिः = उचित समय पर जिसे ठीक बात सूझ जाए,
अभीष्टम् = इच्छा,
प्रोच्चैः = जोर से, विहस्य = हँसकर,
मन्त्रितम् = विचार किया गया,
सम्यक् = उचित, ठीक से,
वाङ्मात्रेणैव = कहने मात्र से ही,
तेषां = उनके, पितृपैतामहिकम् = पूर्वजों के (पिता-दादा के),
त्यक्तुम् = छोड़ना, त्याग करना,
आयुः- क्षयः = आयु का नाश,
अन्यत्र = दूसरी जगह,
गतानामपि = गये हुए लोगों का भी,
अरक्षितम् = बिना रक्षा के,
दैवरक्षितम् = भाग्य से रक्षित,
दैवहतम् = भाग्य का मारा हुआ,
विनश्यति = नष्ट हो जाता है,
विसर्जितः = छोड़ा हुआ,
कृतप्रयत्नोऽपि = प्रयत्न किये जाने पर भी,
यास्यामि = जाऊँगा,
यत्प्रतिभाति = जो प्रतीत होता है,
ज्ञात्वा = जानकर,
निष्क्रान्तौ = दोनों निकल गये,
आलोड्य = मथकर,
निर्मत्स्यताम् = मछलियों से रहित,
नीतः = कर दिया गया,
ब्रवीमि = कहता हूँ,
सुखम् = सुखपूर्वक,
एधेते = बढ़ते हैं, (दो)

टिप्पणी

## बोधप्रश्नाः

**1. संस्कृतभाषया उत्तरं लिखत।**

(क) मत्स्यजीविनां वचः कीदृशम् आसीत्?

(ख) त्रयाणां मत्स्यानां नामानि लिखत।

(ग) अशक्तैः बलिनः शत्रोः समक्षम् किं कर्तव्यम्?

(घ) कौ मत्स्यौ सुखम् एधेते?

(ङ) कः मत्स्यः विनश्यति?

**2. कोष्ठकात् शुद्धम् पदं विचित्य रिक्तस्थानपूर्तिं कुरुत।**

(क) अतः .................. प्रभाते अत्र आगत्य मत्स्यसंक्षयं करिष्यामः। (अद्य/श्वः/ह्यः)

(ख) न युक्तम् .................. क्षणम् अपि अत्र अवस्थातुम्। (रात्रौ/दिने/साम्प्रतम्।)

(ग) अहो न भवद्भ्यां .................. सम्यक् एतदिति (मन्त्रितम्/अवगतम्/पठितम्)

(घ) अरक्षितं तिष्ठति ..................। (दैवहतम्/दैवरक्षितम्/दैववाञ्छितम्)

## 6.2 अधुना पाठम् अवगच्छामः

### 6.2.1 प्रथमः एकांशः

***कस्मिंश्चित् ....... गम्यताम् इति।***

बहुमत्स्योऽयं ह्रदः

मछुआरे सोचते हैं कि यह तालाब तो बहुत सी मछलियों से भरा पड़ा है। हमें आज तक इसका पता ही नहीं चला। मछुआरों की आजीविका का साधन तो मछलियाँ हैं इसलिए जितनी अधिक मछलियों वाला सरोवर उन्हें मिलेगा, उनको उतनी ही अधिक प्रसन्नता होगी। इसी कारण वे उस सरोवर को अनेक प्रकार की मछलियों से भरा देख बहुत प्रसन्न हुए।

अद्य आहारवृत्तिः सञ्जाता

जब मछुआरे उस तालाब को मछलियाँ पकड़ने के लिए उचित समझते हैं तो वे अगले दिन प्रातः वहाँ आने का निर्णय करते हैं क्योंकि उस दिन के भोजन के लिए वे अनेक मछलियाँ कहीं और से पकड़ कर लाए थे। वे थक भी गए थे। अतः वे मछली पकड़ने का काम उस दिन स्थगित करते हैं।

अशक्तैर्बलिनः शत्रोः कर्त्तव्यं प्रपलायनम्।
श्रयितव्योऽथवा दुर्गो नान्या तेषां गतिर्भवेत्।।1।।

## अन्वयः

अशक्तैः बलिनः शत्रोः प्रपलायनम् कर्त्तव्यम् अथवा दुर्गः श्रयितव्यः। तेषाम् अन्या गतिः न भवेत्।

**भावार्थः**– दुर्बलैः जनैः बलशालिनः शत्रोः समक्षं पलायनम् एव कर्तव्यम् अथवा दुर्गस्य आश्रयः ग्रहीतव्यः। तेषां कृते अन्यः उपायः नास्ति।

**अशक्तैः बलिनः शत्रोः प्रपलायनं कर्तव्यम्**

यदि शत्रु बलवान् हो तो कमजोर व्यक्ति का भला इसी में है कि वह वहाँ से भाग जाए। किसी और सुरक्षित स्थान का आश्रय ले ले। अनागतविधाता तथा प्रत्युत्पन्न नामक मत्स्य इस तथ्य से परिचित थे। वे जानते थे कि 'मछुआरे शक्तिशाली हैं और हम कमज़ोर हैं। अगर हम यहाँ से नहीं भागेंगे तो बचने का कोई और उपाय नहीं है। ये शक्तिशाली मत्स्यजीवी प्रातः होते ही हमें पकड़कर मार देंगे।' यही सोचकर वे दोनों सपरिवार रातों-रात वहाँ से भागकर किसी दूसरे सरोवर में चले जाते हैं और सुरक्षित हो जाते हैं।

## व्याकरणबिन्दवः

### सन्धिविच्छेदः

| | | |
|---|---|---|
| बहुमत्स्योऽयम् | = | बहुमत्स्यः + अयम् |
| अस्माभिरन्वेषितः | = | अस्माभिः + अन्वेषितः |
| चापि | = | च + अपि |
| अत्रागत्य | = | अत्र + आगत्य |
| आहूयेदम् | = | आहूय + इदम् |
| उक्तञ्च | = | उक्तम् + च |
| अशक्तैर्बलिनः | = | अशक्तैः + बलिनः |
| क्षणमप्यत्र | = | क्षणम् + अपि + अत्र |
| तदाकर्ण्य | = | तत् + आकर्ण्य |
| ममाप्यभीष्टमेतत् | = | मम + अपि + अभीष्टम् + एतत् |

### समासः

| | | |
|---|---|---|
| प्रभातसमये | = | प्रभातस्य समये (षष्ठीतत्पुरुषः) |
| मत्स्यसंक्षयम् | = | मत्स्यानां संक्षयम् (षष्ठीतत्पुरुषः) |
| प्रत्युत्पन्नमतिः | = | प्रत्युत्यप्रन्ना मतिः यस्य सः (बहुव्रीहिः) |
| बहुमत्स्यः | = | बहवः मत्स्याः यस्मिन् सः (ह्रदः) (बहुव्रीहिः) |

टिप्पणी

**पदपरिचयः**

| | | |
|---|---|---|
| गच्छद्भिः | = | गम् + शतृ, तृतीया बहुवचन (पुं.) |
| अन्वेषितः | = | अनु + इष् + णिच् + क्त प्र. एकवचन (पुं.)। |
| सञ्जाता | = | सम् + जन् + क्त प्र. एकवचन। (स्त्री.) |
| आगत्य | = | आ + गम् = ल्यप्, अव्यय |
| आहूय | = | आ + ह्वे + ल्यप्, अव्यय |
| अभिहितम् | = | अभि + धा + क्त प्र. एकवचन (नपुं.) |
| अवस्थातुम् | = | अव + स्था + तुमुन्, अव्यय। |
| आकर्ण्य | = | आ + कर्ण् + ल्यप्, अव्यय। |
| समागत्य | = | सम् + आ + गम् + ल्यप्, अव्यय। |
| कर्तव्यम् | = | कृ + तव्यत् कर्मवाच्य प्र. एकवचन (नपुं.) |
| श्रयितव्यः | = | श्रि + तव्यत् कर्मवाच्य प्र. एकवचन (पुं.) |

## पाठगतप्रश्नाः 6.1

1. **रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत।**

   (क) <u>बहुमत्स्यः</u> अयं ह्रदः।

   (ख) ते श्वः प्रभाते <u>मत्स्यसंक्षयं</u> करिष्यन्ति।

   (ग) <u>मत्स्यजीविभिः</u> उक्तं सर्वैः श्रुतम्।

   (घ) एतत् <u>मम</u> मनसि वर्तते।

   (ङ) <u>भवता</u> सत्यम् अभिहितम्।

2. **शुद्धं कथनं (√) इति चिह्नेन अशुद्धं च (×) इति चिह्नेन अङ्कितं कुरुत।**

   (i) जलाशये अनागतविधाता, प्रत्युत्पन्नमतिः यद्भविष्यः च निवसन्ति स्म।

   (ii) श्वः सायम् अत्रागत्य मत्स्यसंक्षयं करिष्यामः।

   (iii) अशक्तैः बलिनः शत्रोः प्रपलायनं न कर्तव्यम्।

   (iv) तन्न युक्तं साम्प्रतं क्षणम् अपि अत्र अवस्थातुम्।

   (v) प्रभाते एव गम्यतां किञ्चित् निकटं सरः।

3. **(i) अत्र सप्तमी विभक्तिः नास्ति**

(क) मनसि (ख) जलाशये (ग) वर्तते (घ) रात्रौ

**(ii) अत्र ल्यप् प्रत्ययः नास्ति**

(क) आकर्ण्य (ख) समागत्य (ग) आहूय (घ) पाठय

**(iii) अत्र लट्लकारः नास्ति**

(क) युज्यते (ख) करिष्यामः (ग) वर्तते (घ) प्रतिवसन्ति

**(iv) इदं अव्ययपदं नास्ति**

(क) साम्प्रतम् (ख) गम्यताम् (ग) नूनम् (घ) अतः

## 6.2.2 द्वितीयः एकांशः

*तच्छ्रुत्वा उच्चैः विहस्य .................... यद्भविष्यो विनश्यति।*

### व्याख्या

वाङ्मात्रेणैव पितृपैतामहिकं सरः न त्यक्तुं शक्यते।

**यद्भविष्यः**- जैसा कि इसके नाम से ही प्रतीत होता है कि 'जो होगा सो देखा जाएगा।' वह मत्स्य प्रत्युत्पन्नमति तथा अनागतविधाता की भाँति बहुत दूर की बात नहीं सोचता। जब उसके दोनों मित्रों ने वह सरोवर छोड़ कहीं और जाने को कहा तो उसका उत्तर था कि ''मछुआरों के कहने मात्र से कि कल हम इस तालाब का आलोडन करेंगे, क्या हम दादा परदादा से चली आ रही पैतृक सम्पत्ति रूप इस तालाब को छोड़ देंगे? तुम दोनों जाओ, मैं तो इस तालाब में ही रहूँगा।'

आयुःक्षयोऽस्ति तदा मृत्युः भविष्यत्येव।

यद्भविष्य का विचार उस तालाब को छोड़ अन्यत्र जाने का नहीं है। उसका कहना है कि होनी के द्वार अत्यन्त प्रबल होते हैं। यदि भाग्य में आयु का नष्ट होना ही लिखा है तो कोई बचा नहीं सकता। कहीं भी चले जाएँ, मृत्यु अवश्य ही आकर पकड़ लेगी। मृत्यु के विकराल पञ्जों से कोई नहीं बच सकता।

अरक्षितं तिष्ठति दैवरक्षितं सुरक्षितं दैवहतं विनश्यति।
जीवत्यनाथोऽपि वने विसर्जितः कृतप्रयत्नोऽपि गृहे विनश्यति।।2।।

## अन्वयः

(2) अरक्षितम् दैवरक्षितम् तिष्ठति, सुरक्षितम् दैवहतम् विनश्यति, वने विसर्जितः अनाथः अपि जीवति, गृहे कृतप्रयत्नः अपि विनश्यति।

## भावार्थः

वने केनापि अरक्षितोऽपि जनः दैवैः रक्षितत्वाज्जीवति किन्तु यः गृहे सुरक्षितो भवति सोऽपि दैवहतः नश्यति तस्य रक्षा केनापि कर्तुं न शक्यते।

अरक्षितं तिष्ठति दैवरक्षितम्

जिसकी रक्षा करने वाला कोई नहीं होता, भगवान् उसकी रक्षा अवश्य करते हैं। यदि भाग्य में विनाश लिखा है तो कितनी भी सुरक्षा के प्रबंध किये जाएँ, वह बच नहीं सकता। राजा परीक्षित को बंद लोहे के संदूक में भी साँप ने डस लिया था। इसी प्रकार यदि किसी अनाथ को जंगल में छोड़ दिया जाए तो वह भी जीवित रह जाता है जबकि यदि भाग्य विपरीत हो तो घर में अनेक प्रकार के सुरक्षा के उपाय करने पर भी उसका विनाश हो जाता है। अतः भाग्य में लिखी रेखाओं को कोई नहीं बदल सकता। ऐसा यद्भविष्य का विचार है।

यद्भविष्येण सह निर्मत्स्यतां नीतम्

यद्भविष्य भाग्यवादी था अतः वह सरोवर छोड़ कहीं नहीं गया। परिणामतः अगले दिन प्रातः ही मछुआरे आए, उस तालाब में जाल डाला और यद्भविष्य समेत समस्त मछलियों को पकड़कर ले गए। उनके ऐसा करने से वह सरोवर बिल्कुल मछलियों से रहित हो गया।

> अनागतविधाता च प्रत्युत्पन्नमतिस्तथा
> द्वावेतौ सुखमेधेते यद्भविष्यो विनश्यति। इति।।

## अन्वयः

(2) अनागतविधाता तथा प्रत्युत्पन्नमतिः च, द्वौ एतौ सुखम् एधेते, (परं) यद्भविष्यः विनश्यति।

**भावार्थः**- 'अनागतविधाता' 'प्रत्युत्पन्नमतिः' च सुखेन वर्धेते, किन्तु 'यद्भविष्यः' इति नामकः मत्स्यः मृत्युं प्राप्नोति।

**व्याख्या**- अनागतविधाता और प्रत्युत्पन्नमति दोनों सुख और वृद्धि को प्राप्त करते हैं क्योंकि वे दोनों समय रहते तालाब बदल लेते हैं, किन्तु यद्भविष्य नष्ट हो जाता है क्योंकि वह भाग्य के सहारे वहीं पड़ा रह जाता है। भाग्यवाद को इसी लिए अच्छा नहीं माना गया है। समय रहते उचित कर्म न करने वाले की यही गति होती है।

## व्याकरणबिन्दवः

### सन्धिविच्छेदः

| | | | | |
|---|---|---|---|---|
| तच्छ्रुत्वा | = | तत् | + श्रुत्वा | |
| भविष्यत्येव | = | भविष्यति | + एव | |
| जीवत्यनाथोऽपि | = | जीवति | + अनाथः | + अपि |
| मत्स्यजीविभिर्जालेन | = | मत्स्यजीविभिः | + जालेन | |
| अतोऽहम् | = | अतः | + अहम् | |
| द्वावेतौ | = | द्वौ | + एतौ | |

### समासाः

| | | | |
|---|---|---|---|
| आयुःक्षयः | = | आयुषः क्षयः | (षष्ठीतत्पुरुषः) |
| अरक्षितम् | = | न रक्षितम् | (नञ्तत्पुरुषः) |
| दैवरक्षितम् | = | दैवेन रक्षितम् | (तृतीयातत्पुरुषः) |
| अनाथः | = | न अस्ति नाथः यस्य सः | (बहुव्रीहिः) |
| कृतप्रयत्नः | = | कृतः प्रयत्नः येन सः | (बहुव्रीहिः) |
| दैवहतम् | = | दैवेन हतम् | (तृतीयातत्पुरुषः) |

### पदपरिचयः

| | | | |
|---|---|---|---|
| श्रुत्वा | = | श्रु | + क्त्वा |
| विहस्य | = | वि + हस् | + ल्यप् |
| त्यक्तुम् | = | त्यज् | + तुमुन् |
| रक्षितम् | = | रक्ष् | + क्त |
| हतम् | = | हन् | + क्त |
| ज्ञात्वा | = | ज्ञा | + क्त्वा |
| आलोड्य | = | आ + लोड् | + ल्यप् |

## पाठगतप्रश्नाः 6.2

1. प्रश्नानाम् उत्तराणि एकपदेन एव संस्कृतभाषया लिखत।

टिप्पणी

(क) कै: सर: निर्मत्स्यतां नीतम्?

(ख) वने विसर्जित: अपि क: जीवति?

(ग) कस्य नाश: भवति?

(घ) मत्स्यौ किं त्यक्त्वा अन्यत्र निष्क्रान्तौ?

(ङ) क: मत्स्यजीविनां वाङ्मात्रेणैव सर: त्यक्तुं न इच्छति?

**2. निर्देशानुसारं भिन्नप्रकृतिकं पदं चिनुत।**

(क) विहस्य, तस्य, आलोड्य, आहूय (प्रत्ययानुसारम्)

(ख) उच्चै:, यदि, सह, द्वौ (अव्ययपदानुसारम्)

(ग) यास्यामि, विनश्यति, एधेते, ब्रवीमि (लकारानुसारम्)

(घ) सर:, यद्भविष्य:, अनागतविधाता, अनाथ: (लिंगानुसारम्)

(ङ) यद्भविष्येण, मत्स्यजीविभि:, भवद्भ्याम्, गतानाम्। (विभक्ति-अनुसारम्)

**3. अधोलिखितयुग्मेषु विशेषणपदं विशेष्यपदं च पृथक् कृत्वा लिखत।**

| | विशेषणम् | विशेष्यम् |
|---|---|---|
| (क) पितृपैतामहिकम् सर: | .......................... | .......................... |
| (ख) तं निश्चयम् | .......................... | .......................... |
| (ग) अनाथ: वनविसर्जित: | .......................... | .......................... |
| (घ) आगतै: मत्स्यजीविभि: | .......................... | .......................... |

**4. अर्थान् मेलयत।**

| | |
|---|---|
| (क) सरोवरं | (1) श्रुत्वा |
| (ख) इमौ | (2) लभेते |
| (ग) आकर्ण्य | (3) सर: |
| (घ) मरणम् | (4) उक्तम् |
| (ङ) प्रात:काले | (5) एतौ |

(च) विचारितम् (6) मृत्युः

(छ) कथितम् (7) मन्त्रितम्

(ज) प्राप्नुतः (8) प्रभाते

## किमधिगतम्?

- अस्माभिः विपत्तेः पूर्वमेव तन्निवारणाय उपायाः चिन्तनीयाः।
- यद्भविष्यवत् जीवनं न यापयितव्यम्।
- तत्पुरुषसमासे उत्तरपदं प्रधानं भवति।
- क्त्वा-तुमुन्-प्रत्ययान्तानां प्रयोगैः निर्मितानि पदानि अव्ययानि भवन्ति।
- विशेषणे विशेष्यानुसारं विभक्तिलिङ्गवचनप्रयोगः भवति।

## योग्यताविस्तारः

### (क) ग्रन्थपरिचयः

पञ्चतन्त्र के लेखक पं. विष्णुशर्मा हैं। ऐसा माना जाता है कि दक्षिण भारत के (किसी राज्य में) महिलारोप्य नामक नगर के राजा के मूर्ख पुत्रों को शिक्षित करने के लिए विष्णुशर्मा ने नीतिगत उपदेशों को संगृहीत करके पाँच भागों में विभक्त किया जिनके नाम हैं- मित्रभेदः, मित्रसंप्राप्तिः, काकोलूकीयम्, लब्धप्रणाशः, अपरीक्षितकारकम्। यह अत्यन्त उपयोगी ग्रंथ है। विश्व की लगभग समस्त भाषाओं में इसका अनुवाद हो चुका है। इसमें पशु-पक्षियों की कथाओं के माध्यम से गूढ़ नीतियों तथा व्यवहारों की शिक्षा दी गयी है। इस कथाग्रन्थ में अनेक ऐसी कहानियाँ हैं जो व्यक्ति को दूरदर्शी बनने की प्रेरणा देती हैं।

संस्कृत के कथासाहित्य के अंतर्गत पञ्चतन्त्र के अतिरिक्त गुणाढ्य का बृहत्कथासरित्सागर, बल्लालसेनरचित भोजप्रबन्धः, वेतालपंचविंशतिः, सिंहासनद्वात्रिंशत्पुत्तलिका तथा हितोपदेश आदि ग्रन्थ प्रमुख हैं।

### (ख) भाषिकपक्षः

### I. पर्यायवाचिपदानि

ह्रदः = सरोवरः, सरः, जलाशयः

श्रुत्वा = श्रवणं कृत्वा, निशम्य, आकर्ण्य।

मन्त्रितम् = विचारितम्, चिन्तितम्, कथितम्।

यास्यामि = गमिष्यामि, एष्यामि, चलिष्यामि।

बलिनः = बलशालिनः, शक्तिशालिनः, सामर्थ्यवन्तः।

साम्प्रतम् = अधुना, इदानीम्, अस्मिन् काले।

वचः = वचनं, कथनं, वार्ताम्।

## II. कृदन्तप्रत्ययाः

**तुमुन्** – इस प्रत्यय का प्रयोग धातु के साथ 'के लिए' अर्थ में होता है तथा तुम् शेष रह जाता है।

यथा पठ् + तुमुन् = पठितुम् = पढ़ने के लिए

गम् + तुमुन् = गन्तुम् = जाने के लिए

अव + स्था + तुमुन् = अवस्थातुम् = ठहरने के लिए

मूलधातु + प्रत्यय

पठ् + तुमुन् = पठितुम् (पढ़ने के लिए)

(उदाहरण – सः पठितुं गच्छति। वह पढ़ने के लिए जाता है।)

शुच् + तुमुन् = शोचितुम्

त्यज् + तुमुन् = त्यक्तुम्

खाद् + तुमुन् = खादितुम्

भू + तुमुन् = भवितुम्

हन् + तुमुन् = हन्तुम्

पा + तुमुन् = पातुम्

वच् + तुमुन् = वक्तुम्

गम् + तुमुन् = गन्तुम्

श्रु + तुमुन् = श्रोतुम्

ज्ञा + तुमुन् = ज्ञातुम्

दा + तुमुन् = दातुम्

तुमुन् प्रत्ययान्त शब्द अव्यय हो जाते हैं जिनका रूप परिवर्तित नहीं होता।

## III. व्याकरणबिन्दवः

**व्यञ्जन-सन्धि**– स्वर या व्यञ्जन वर्णों के कारण व्यञ्जन वर्ण में जो परिवर्तन होता है उसे व्यञ्जन-सन्धि कहते हैं। इसके प्रमुख नियम निम्नलिखित हैं:-

**(क) मोऽनुस्वारः–** 'म्' का अनुस्वार (-)–

यदि शब्द के अन्त में 'म्' हो और उसके बाद कोई भी व्यञ्जन आए तो 'म्' का अनुस्वार हो जाता है। यथा–

ग्रामम् + याति = ग्रामं याति, पत्रम् + लिख = पत्रं लिख

हरिम् + वन्दे = हरिं वन्दे सम् + वृत्तः = संवृत्तः

**(ख) जश्त्व (जश्) सन्धि** – वर्गीय प्रथम वर्णों को तृतीय वर्ण – यदि प्रथम पद के अन्त में वर्गों के प्रथम वर्ण हो और उसके बाद कोई भी स्वर हों या किसी भी वर्ग का तृतीय, चतुर्थ या पञ्चम वर्ण हों या 'य्', 'र्', 'ल्', 'व्' ह में से कोई वर्ण हो तो वर्ग के प्रथम वर्ण को उसी वर्ग का तृतीय वर्ण हो जाएगा। यथा–

क् का ग् – पृथक् + उच्यते = पृथगुच्यते; वाक् + ईशः = वागीशः सम्यक् + एतत्+इति = सम्यगेतदिति

च् का ज् - अच् + अन्तः = अजन्तः, अच्+आदि = अजादि

त् का द - कदाचित् + अपि = कदाचिदपि, तत् + अद्य = तदद्य

प्रथम वर्ग का पञ्चम वर्ण में परिवर्तन – यदि वर्ग के प्रथम वर्ण के बाद वर्ग का पञ्चम वर्ण हो तो प्रथम वर्ण को उसी वर्ग का पञ्चम वर्ण हो जाता है। यथा–

षट् + नवतिः = षण्णवतिः, षट् + नाम् = षण्णाम्

सत् + नाम = सन्नाम, सत् + नासिका = सन्नासिका

एतत् + मम = एतन्मम, तत् + नूनम् = तन्नूनम्

**(ग) छत्व सन्धिः (शश्छोऽटि)**

तकार को चकार तथा श् को विकल्प से छ्–

किसी भी वर्ग के प्रथम, द्वितीय, तृतीय, चतुर्थ वर्ण के, शब्द के अन्त में होने पर और उसके बाद श् होने पर तथा उसके बाद में यदि कोई स्वर या ह्, य्, व्, र् में से कोई वर्ण हो तो श् को विकल्प से छ् हो जाता है और (श्चुत्व सन्धि) के नियमानुसार तकार का चकार हो जाता है। यथा–

एतत् +श्रुत्वा = एतच्छ्रुत्वा तत् + शिवः = तच्छिवः

तत् + शृणोति = तच्छृणोति तत् + श्रीः = तच्छ्रीः

## IV. विसर्ग सन्धिः–

उत्वम्–

विसर्ग को 'उ' करने का नियम–

यदि विसर्ग से पूर्व 'अ' हो और उसके बाद 'अ' या किसी भी वर्ग का तृतीय, चतुर्थ, पञ्चम वर्ण या 'य्', 'र्', 'ल्' 'व्' तथा ह वर्ण हों तो विसर्ग का 'उ' हो जाता है एवं 'अ' और 'उ' मिलकर 'ओ' हो जाता है। यथा–

अ + : + अ = अ + उ + अ = ओ + अ = ओऽ

प्रथमः + अध्यायः = प्रथमोऽध्याय; सः + अपि = सोऽपि

मनः + हरः = मनोहरः — कः + अवदत् = कोऽवदत्

कः + अपि = कोऽपि — श्रयितव्यः + अथवा = श्रयितव्योऽथवा

मत्स्यजीविनः + अत्र = मत्स्यजीविनोऽत्र, — कृतप्रयत्नः + अपि = कृतप्रयत्नोऽपि

बहुमत्स्यः + अयं = बहुमत्स्योऽयं, — क्षयः + अस्ति = क्षयोऽस्ति

जीवत्यनाथः + अपि = जीवत्यनाथोऽपि, — अतः + अहम् = अतोऽहम्

धर्मः + रक्षति = धर्मो रक्षति

## IV. संख्यावाचक शब्दों के रूप

1. एकः = एक (एकवचन)

| विभक्ति | एकवचन (पुं.) | स्त्री. | नपुं. |
|---|---|---|---|
| प्रथमा | एकः | एका | एकम् |
| द्वितीया | एकम् | एकाम् | एकम् |
| तृतीया | एकेन | एकया | एकेन |
| चतुर्थी | एकस्मै | एकस्यै | एकस्मै |
| पञ्चमी | एकस्मात् | एकस्याः | एकस्मात् |
| षष्ठी | एकस्य | एकस्याः | एकस्य |
| सप्तमी | एकस्मिन् | एकस्याम् | एकस्मिन् |

2. द्वि = दो (द्वि शब्द सभी लिंगों में नित्य द्विवचनान्त होता है)

| **विभिक्ति** | **पुंल्लिंग** | **स्त्रीलिङ्ग** | **नपुंसकलिङ्ग** |
|---|---|---|---|
| प्रथमा | द्वौ | द्वे | द्वे |

| | | | |
|---|---|---|---|
| द्वितीया | द्वौ | द्वे | द्वे |
| तृतीया | द्वाभ्याम् | शेष पुंल्लिद्व की तरह | |
| चतुर्थी | द्वाभ्याम् | | |
| पञ्चमी | द्वाभ्याम् | | |
| षष्ठी | द्वयोः | | |
| सप्तमी | द्वयोः | | |

3. त्रि = तीन (बहुवचन)

| **विभक्ति** | **पुंल्लिंग** | **स्त्रीलिङ्ग** | **नपुंसकलिङ्ग** |
|---|---|---|---|
| प्रथमा | त्रयः | तिस्रः | त्रीणि |
| द्वितीया | त्रीन् | तिस्रः | त्रीणि |
| तृतीया | त्रिभिः | तिसृभिः | शेष पुँल्लिङ्ग की तरह |
| चतुर्थी | त्रिभ्यः | तिसृभ्यः | |
| पञ्चमी | त्रिभ्यः | तिसृभ्यः | |
| षष्ठी | त्रयाणाम् | तिसृणाम् | |
| सप्तमी | त्रिषु | तिसृषु | |
| सम्बोधन | हे त्रयः | हे तिस्रः | |

4. चतुर् = चार (बहुवचन)

| **विभक्ति** | **पुँल्लिङ्ग** | **स्त्रीलिङ्ग** | **नपुंसकलिङ्ग** |
|---|---|---|---|
| प्रथमा | चत्वारः | चतस्रः | चत्वारि |
| द्वितीया | चतुरः | चतस्रः | चत्वारि |
| तृतीया | चतुर्भिः | चतसृभिः | शेष रूप पुल्लिङ्ग के समान होंगे |
| चतुर्थी | चतुर्भ्यः | चतसृभ्यः | |
| पञ्चमी | चतुर्भ्यः | चतसृभ्यः | |
| षष्ठी | चतुर्णाम् | चतसृणाम् | |
| सप्तमी | चतुर्षु | चतसृषु | |
| संबोधन | हे चत्वारः | हे चतस्रः | हे चत्वारि |

5. पञ्चन् = पाँच (बहुवचन)

| विभक्ति | पुँल्लिङ्ग | स्त्रीलिङ्ग | नपुंसकलिङ्ग |
|---|---|---|---|
| प्रथमा | पञ्च | | |
| द्वितीया | पञ्च | | |
| तृतीया | पञ्चभिः | | |
| चतुर्थी | पञ्चभ्यः | यही रूप स्त्रीलिङ्ग व नपुंसकलिङ्ग में होता है। | |
| पञ्चमी | पञ्चभ्यः | | |
| षष्ठी | पञ्चानाम् | | |
| सप्तमी | पञ्चसु | | |
| संबोधन | हे पञ्च | | |

## पाठान्तप्रश्नाः

1. **अधोलिखितानि कथनानि कः कं प्रति कथयति**

   (क) अहो बहुमत्स्योऽयं ह्रदः कदाचिदपि
   न अस्माभिरन्वेषितः।

   (ख) अहो, श्रुतं भवद्भिः यत् मत्स्यजीविभिः
   अभिहितम्।

   (ग) सत्यमभिहितं भवता।
   तदन्यत्र गम्यताम्।

   (घ) न भवद्भ्यां मन्त्रितं सम्यक् एतत्।

2. **सन्धियुक्तपदेषु/सन्धिच्छेदेषु रिक्तस्थानानि पूरयत**

   (क) अस्माभिः + ................ = अस्माभिरन्वेषितः

   (ख) ................ + ................ = आहूयेदम्

(ग) अशक्तैः + बलिनः = ................

(घ) तत् + नूनम् = ................

(ङ) ................ + अत्र = मत्स्यजीविनोऽत्र

3. **पाठात् अव्ययपदानि विचित्य रिक्तस्थानानि पूरयत**

(क) रात्रौ ................ गम्यताम्।

(ख) ................ कदाचित् मत्स्यजीविभिः सः जलाशयः दृष्टः।

(ग) यद्‌भविष्यः ................ विहस्य प्रोवाच।

(घ) अनागतविधाता प्रत्युत्पन्नमतिः ................ सुखम् एधेते।

(ङ) .......... आयुक्षयोऽस्ति ......... अन्यत्र गतानाम् अपि मृत्युः भविष्यति एव।

(च) ................ सत्यमभिहितं भवता।

च, अहो, उच्चैः, एव, अथ, तदा, यदि

4. **विलोमपदानि कोष्ठकात् चित्वा लिखत**

| | |
|---|---|
| (क) श्वः | (अद्य/ ह्यः) |
| (ख) सनाथः | (अनाथः/विनाथः/गतनाथः) |
| (ग) दुःखम् | (सुखम्/आनन्दः/हर्षः) |
| (घ) समर्थैः | (अनन्यैः/अनर्थैः/अशक्तैः) |
| (ङ) अनभीष्टम् | (कथनम्/अभीष्टम्/प्रियम्) |

5. **घटनाक्रमानुसारं कथां पुनः लिखत,**

(क) एकदा मत्स्यजीविभिः तत्रागत्य चिन्तितम्, ''श्वः मत्स्यसंक्षयं करिष्यामः।''

(ख) प्रत्युत्पन्नमतिः अनागतविधाता च सुखम् एधेते स्म।

(ग) एकस्मिन् जलाशये अनागतविधाता, प्रत्युत्पन्नमतिः यद्‌भविष्यः च वसन्ति स्म।

(घ) इत्थं यद्‌भविष्यः विनाशम् आप्नोत्।

(ङ) तेषां वचनैः भयभीतौ प्रत्युत्पन्नमतिः अनागतविधाता च रात्रौ एव सपरिवारम् अन्यत्र सरोवरं गतवन्तौ।

टिप्पणी

(च) यद्भविष्यः ततः न अगच्छत्।

(छ) प्रातः मत्स्यजीविभिः तत्सरः यद्भविष्येण सह निर्मत्स्यतां नीतम्।।

(ज) सः अचिन्तयत्, ''यदि आयुः क्षयः अस्ति अन्यत्र गतानामपि तु मृत्युः आगमिष्यति एव।''

## उत्तरतालिका

**बोधप्रश्नाः**

1. (क) कुलिशपातोपमम्, (ख) अनागतविधाता, प्रत्युत्पन्नमतिः, यद्भविष्यः च,

   (ग) प्रपलायनम्, (घ) अनागतविधाता, प्रत्युत्पन्नमतिः च, (ङ) यद्भविष्यः।

2. (क) श्वः, (ख) साम्प्रतम्, (ग) मन्त्रितम्, (घ) दैवरक्षितम्।

**पाठगतप्रश्नाः 6.1**

1. (क) कीदृशः, (ख) किं, (ग) कैः, (घ) कस्य, (ङ) केन।

2. (i) √ (ii) × (iii) × (iv) √ (v) ×।

3. (i) ग (ii) घ (iii) ख (iv) ख।

**पाठगतप्रश्नाः 6.2**

1. (क) मत्स्यजीविभिः (ख) अनाथः (ग) यद्भविष्यस्य (घ) सरोवरम्

   (ङ) यद्भविष्यः।

2. (क) तस्य (ख) द्वौ (ग) यास्यामि (घ) सरः (ङ) गतानाम्।

| | | **विशेषणानि** | **विशेष्याणि** |
|---|---|---|---|
| 3. | (क) | पितृपैतामहिकम् | सरः |
| | (ख) | तं | निश्चयम् |
| | (ग) | वनविसर्जितः | अनाथः |
| | (घ) | आगतैः | मत्स्यजीविभिः |

4. (क) क + 3, ख + 5, ग + 1, घ + 6, ङ + 8, च + 7, छ + 4, ज + 2

टिप्पणी

**पाठान्तप्रश्नाः**

1. कः-कं प्रति

   (क) मत्स्यजीविनः-परस्परम् (ख) अनागतविधाता-मत्स्यान्

   (ग) प्रत्युत्पन्नमतिः-अनागतविधातारम्

   (घ) यद्भविष्यः-अनागतविधातारम्, प्रत्युत्पन्नमतिं च

2. (क) अन्वेषितः (ख) आहूय + इदम् (ग) अशक्तैर्बलिनः (घ) तन्नूनम्

   (ङ) मत्स्यजीविनः

3. (क) एव (ख) अथ (ग) उच्चैः (घ) च (ङ) यदि, तदा (च) अहो!

4. (क) श्वः - अद्य, (ख) सनाथः - अनाथः, (ग) दुःखम् - सुखम्

   (घ) समर्थैः - अशक्तैः, (ङ) अनभीष्टम् - अभीष्टम्

5. (i) एकस्मिन् जलाशये अनागतविधाता, प्रत्युत्पन्नमतिः, यद्भविष्यः च वसन्ति स्म।

   (ii) एकदा मत्स्यजीविभिः तत्रागत्य चिन्तितम्, श्वः मत्स्यसंक्षयं करिष्यामः।

   (iii) तेषां वचनैः भयभीतौ अनागतविधाता प्रत्युत्पन्नमतिः च रात्रौ एव सपरिवारम् अन्यत्र सरोवरं गतवन्तौ।

   (iv) यद्भविष्यः ततः नागच्छत्।

   (v) सः अचिन्तयत्, यदि आयुः क्षयः अस्ति तर्हि अन्यत्र गतानामपि मृत्युः आगमिष्यति एव।

   (vi) प्रातः मत्स्यजीविभिः तत् सरः यद्भविष्येण सह निर्मत्स्यतां नीतम्।

   (vii) इत्थं यद्भविष्यः विनाशम् आप्नोत्।

   (viii) अनागतविधाता प्रत्युत्पन्नमतिः च सुखम् एधेते स्म।